# मूलस्तरीयं गणतन्त्रम् – तृतीयः भाग नगरक्षेत्रेषु स्थानीयप्रशासनम्

अध्यायः १२

"अहं इच्छामि यत् ... अधुनैव पूर्णरूपेण स्थानीय-संस्थायाः निर्माणं भवेत्, येन जनाः वास्तविकतया इदं ज्ञातुं शक्नुवन्ति यत् प्रशासनं किम् अस्ति, को नाम मताधिकारः, काश्च क्षमताः, के चाधिकाराः, लघुस्तरे, स्वनगरेषु, ग्रामेषु च के विशेषाधिकाराः सन्ति।"

— *रुस्तम के सिधवा, सदस्यः, संविधानसभा*

*(१९४९ तमे वर्षे अक्टूबरमासस्य त्रयोदशतमदिनाङ्के संविधानसभायाः वादविवादावसरे)*

**चित्रम्. १२.१ इति। मुम्बइ-महानगरनिगमः ('मुम्बइ-नगरनिगमः' इति १८६५ तमे ख्रीष्टाब्दे निर्मितः आसीत्।)**



## महत्त्वपूर्णाः प्रश्नाः ?

१. नागरिकक्षेत्रेषु स्थानीयाः संस्थाः काः सन्ति, कानि च तेषां कार्याणि ?

२. शासनव्यवस्थायां लोकतन्त्रे च किमर्थं ताः महत्त्वपूर्णाः सन्ति ?

0681CH12

not to be republished

## उपक्रमः

पूर्वाध्यायेषु दर्शितं यत् कथं,लोकतन्त्रे, सुशासननिमित्तं नागरिकाणां सशक्तिकरणं भवति येन ते स्वदेशस्य हिताय ग्रामीणस्तरे, क्षेत्रीयस्तरे, नागरिकस्तरे, राज्यस्तरे राष्ट्रियस्तरे वा शासनकार्येषु सक्रियरूपेण भागं गृह्णन्ति। एषा सहभागिता पूर्ण-लोकतन्त्रस्य विस्तृतकल्पना अस्ति।

ग्रामीणक्षेत्रस्य सन्दर्भे शासनव्यवस्थायाः मौलिकविषयान् वयं दृष्टवन्तः। अधुना नागरिकपरिदृश्ये कथम् एतत् कार्यं करोति इति पश्यामः। यतो हि नागरिकं जीवनं सामान्यतया ग्रामस्तरस्य अपेक्षया अधिकं जटिलं वैविध्यपूर्णं च भवति, अतः नागरिस्तरे शासनव्यवस्थाऽपि अधिका जटिला भवति इति अवगम्यते एव। तथापि वयम् अत्र केवलं तस्य मूलभूतसिद्धातानि एव पश्यामः।

### एहि, वयम् अन्विषामः

→ किमर्थं कोलकाता, चेन्नई, मुम्बई इत्यादिसदृशानि महानगराणि ग्रामस्य क्षुद्रनगरस्य वा अपेक्षया जटिलं विविधतायुक्तं च भवन्ति ?

→ सहपाठिभिः सह यस्य कस्यापि नगरस्य विषये भवन्तः जानन्ति तत्र निवसतां विविधसमुदायानाम् एकां सूचीं कुर्वन्तु। भवन्तः कति सूचीं कर्तुं समर्थाः आसन् ? तत्र सूच्यां किम् अन्यत् भवन्तः अवलोकयन्ति ?

नागरिकक्षेत्रेषु शासनस्य प्रशासनस्य च विषये अन्वेषणात् पूर्वम् इयम् आलोचना ग्रामस्तरात् राष्ट्रीयस्तरपर्यन्तं भारतीयशासनव्यवस्थायाः सामग्रिकरूपेण अवलोकनं कर्तुं अस्माकं साहाय्यं करोति। यथा, १७५ तमे पृष्ठे १२.२ इति चित्रे दर्शितम् अस्ति। अस्य पिरामिडस्य आधारः अस्ति स्थानीयस्तरः, यः जनैः सह सर्वाधिकसम्बद्धः अस्ति। अस्य शीर्षभागस्तु राष्ट्रियस्तरः अस्ति । एकादशतमे अध्याये वयं पिरामिडस्य वामभागस्य अन्वेषणं कृतवन्तः। अधुना तस्य दक्षिणभागस्य अवलोकनं करिष्यामः।

© NCERT not to be republished




चित्रम् १२.२

## एहि, वयम् अन्विषामः

उपरि १२.२ तमे चित्रे पञ्चायतराजव्यवस्थायाः नागरिकस्थानीयसर्वकारस्य च मध्ये काः समानताः भेदाश्च लक्षिताः सन्ति?

## नगरस्तरे स्थानीयं पौर-प्रशासनम्

नागरिकक्षेत्रेषु स्थानीयप्रशासनस्य संरचनाः 'स्थानीयं पौर-प्रशासनम्' इति उच्यन्ते । ते विकेन्द्रीकृताः भवन्ति। नाम शीर्षस्थाने केन्द्रीयप्राधिकरणस्य अधीने कार्यस्य अपेक्षया





© NCERT not to be republished

स्थानीयसमुदायाः स्वक्षेत्राणां प्रबन्धनं कथं करणीयम् अथवा तत्र याः समस्याः सन्ति तेषां समाधानं कथं कर्तव्यम् इत्येतेषां विषये स्वयमेव सिद्धान्तानि स्वीकुर्वन्तु इति अस्य प्रत्यक्षः अभिप्रायः अस्ति। अनेन मार्गेण कस्मिंश्चित् क्षेत्रे निवसन्तः नागरिकाः एकत्र आगत्य तेषां कृते किं श्रेयस्करम् भवति इति स्वयमेव निर्णयं कर्तुं शक्नुवन्ति।

नगराणि जनपदानि च 'पौरक्षेत्रम्' इति लघ्वंशेषु विभक्ताः सन्ति, तथा च पौर-समितयः स्वास्थ्यशिबिराणां सञ्चालनं, प्लास्टिक-त्यागः इति विषयं स्वीकृत्य अभियानम् इत्यादिविविधक्रियाकलापानाम् आयोजनं कुर्वन्ति। यत्र कुत्रापि दोषः समस्या वा अस्ति, ते तेषां पर्यवेक्षणं कुर्वन्ति - यथा, जलस्रावः (वाटार-लिकेज), अवरुद्ध-जलनिर्गमन-नाली (ब्लकड् ड्रेन), क्षतिग्रस्तः मार्गः इत्यादिसमस्यासु - दृष्टिपातं कुर्वन्ति - तथा एतादृशीनां समस्यानां विषये अधिकारिनः सूचयन्ति। परन्तु पौरसमितीनां कार्याणि राज्यभेदे तेषां नियमानाम् आधारेण भिन्नानि भवितुम् अर्हन्ति ।

[redacted] [redacted]

[redacted] [redacted]

समग्रतया, स्थानीयानि पौर-प्रशासनानि अनेकविधकार्याणां कृते उत्तरदायिनः सन्ति - यथा, मूलसौकर्याणां परिपालने साहाय्यम्, शवदाहस्थानस्य व्यवस्थापनम्, अपशिष्टसङ्ग्रहणं तथा निष्कासनं, सर्वकारीय-योजनानां कार्यान्वयनम्, स्थानीयकराणां दण्डानां च सङ्ग्रहणम् इत्यादीन् विविधान् विषयान् निरीक्षन्ति। स्थानीयक्षेत्रस्य आर्थिकविकासाय सामाजिकविकासाय च एतासां योजनानाम् महती भूमिका अस्ति।

परन्तु प्रशासनस्य एते विभागाः स्वकार्याणि कुशलतया कर्तुं शक्नुवन्ति इति तस्य कृते

© NCERT not to be republished

नगरे निवसन्तः जनाः अपि स्वकर्तव्यं कर्तुं अर्हन्ति। अस्य अर्थः अस्ति, तैरपि स्वस्थानस्य परिचर्या करणीया, स्वस्योत्तरदायित्वं च अवश्यमेव पालनीयम् इति। (स्मर्यतां यत् एतत् सहभागितापूर्णं लोकतन्त्रम् अस्ति)। उदाहरणार्थं, यदि जनाः अपशिष्टविभाजनसम्बद्धानां निर्देशानां सावधानतापूर्वकम् अनुसरणं कुर्वन्ति तर्हि अपशिष्ट-सङ्ग्रहणं सुकरं भवति। अथवा यदि वीथिकायां जलस्रावं लक्षितं तर्हि शीघ्रमेव तस्य सूचना दातव्या येन बहुमूल्यजलस्य अधिकः अपव्ययः न स्यात्।

## एहि, वयम् अन्विषामः

किं भवन्तः एतादृशानि चत्वारि पञ्च वा कार्याणि चिन्तयितुं शक्नुवन्ति यानि दायित्वशीलनागरिकाः स्वस्य पौरक्षेत्रस्य साहाय्यार्थं कर्तुं शक्नुवन्ति ?




चित्रम् १२.३. मद्रासनिगमः

अष्टाशीत्युत्तर-षोडशततमे (१६८८) वर्षे सितम्बरमासस्य ऊनत्रिंशत्-(२९)-तमे दिवसे स्थापितः मद्रासनिगमः (अधुना ग्रेटर-चेन्नई-निगमः) भारतस्य सर्वप्राचीना नगरपालिका-संस्था अस्ति। तस्य पूर्ववर्षम् ईस्ट-इण्डिया-कम्पनी 'फोर्ट-सेन्ट-जार्ज्' इति नगरं तथा दुर्गात् षोडश-(१६)-किलोमिटर-परिमिताभ्यन्तरे सर्वाणि स्थानानि एकत्र कृत्वा निगमरूपेण च स्थापयित्वा शासनपत्रं प्राकाशयत्। द्वानवत्युत्तर-सप्तदशशततमे (१७९२) वर्षे संसदीयाधिनियमेन मद्रासनिगमाय नागरिकेभ्यः नगरपालिकाकरं ग्रहीतुम् अधिकारः दत्तः आसीत्।तदा आरभ्य एव नगरपालिकाप्रशासनस्य सम्यक् आरम्भः अभवत्।



not to be republished © NCERT

## इन्दौर-नगरनिगमस्य अन्तर्वर्तिन्यः सेवाः

| | | | |
|---|---|---|---|
| सम्पत्ति-करः | जल-करः | कठिनानां वर्ज्यानां प्रबन्धनम् | व्यापारः, संग्रहणम्, व्यापारय अनुज्ञापत्रम् |
| सि.आर.एम*- विवाहप्रमाणपत्रम् | सि.आर.एम*- अग्निसुरक्षा | सि.आर.एम*- विविधप्रकाराणि अनुज्ञापत्राणि | सि.आर.एम*- जलाधारः, वर्ज्यनिर्वहणम् |

| | |
|---|---|
| वृक्षच्छेदनं वृक्षपरिवहनं च | सि.आर.एम*- अभियोगः |

## सि.आर.एम*- अनुरुद्धाः सेवाः

| | | | | | |
|---|---|---|---|---|---|
| जलाधारः | वर्ज्यपरिस्कारयानम् | सभागारः | शववाहकयानम् | चलत्-शौचालयः | रुग्णवाहिका |

*सि.आर.एम*— सिटिजेन रिलेशनशिप म्यानेजमेन्ट (ग्राहकसम्बन्धप्रबन्धनम्)

(इन्दौरनगरनिगमस्य सेवानां सूची अत्र सरलरूपेण दत्ता अस्ति।)

चित्रम् १२.४. इन्दौर-नगर-निगमस्य अन्तर्वर्तिन्यः सेवाः

© NCERT not to be republished

## विषयेऽस्मिन् चिन्तयन्तु

मध्यप्रदेशस्य इन्दौरनगरः स्वच्छ-सर्वेक्षण-सर्वकारीय-योजनायाः अन्तर्गतं सप्तवर्षेभ्यः क्रमशः भारतस्य स्वच्छतमनगरत्वेन पुरस्कृतः अस्ति। अस्मिन् अवदाने इन्दौर-नागरिकाणां का भूमिका भवितुम् अर्हति स्म ?

यथा वयं पश्यामः, चेन्नई-इन्दौर-नगरयोः नगरीयनिकायानां शीर्षस्थाने नगरनिगमः अस्ति। केवलं दशलक्षाधिकजनसंख्यायुक्तेषु नगरेषु एव नगरनिगमः(‘महानगर-निगमः’ इति अपि उच्यते) सर्वोच्चसंस्थात्वेन भवति। एकलक्ष्यात् दशलक्ष्यपर्यन्तं जनसंख्यायुक्तेषु नगरेषु नगरपरिषद् इति (‘नगरपालिका’ इति अपि उच्यते) अस्ति। अल्पजनसंख्यायुक्तेषु नगरेषु, जनपदेषु च नगरपञ्चायतः इति अस्ति।

## एहि, वयम् अन्विषामः

→ स्वराज्यात्, कतिपयप्रतिवेशिराज्येभ्यः च केषाञ्चन नगराणां नामानि चिन्वन्तु। एतेषु भवन्तः यस्मिन् नगरे निवसन्ति तन्नगरस्य नाम अथवा तस्य समीपस्थस्य कस्यापि नगरस्य नाम वक्तुं शक्नुवन्ति। तत्र नगरपंचायतः अस्ति अथवा नगरपरिषद् अस्ति नगरनिगमः वा अस्ति इति भवन्तः कथं ज्ञास्यन्ति? एकां सारणीं कृत्वा तत्र एतेषां नगराणां नामानि तथा तेषु प्रत्येकस्य स्थानीय-पौर-प्रशासनस्य प्रकारं च लिखन्तु।

→ स्थानीय-पौर-संस्थाः स्वकार्याणां कृते कथं वित्तपोषणं कुर्वन्ति? (सङ्केतः - १७८ तमे पृष्ठे १२.४ इति अंशे इन्दौरनगरनिगमेन कृतानां कार्याणां चित्राणि सम्यक्तया पश्यन्तु।) तेषु काश्चन सशुल्कसेवाः सन्ति वा ?

**समीरः** - नमस्कारः! भवतीमत्र पूर्वं न दृष्टवान् अस्मि। भवती अस्मिन् ग्रामे नूतना अस्ति वा?

**अनिता** - नमो नमः! आम्, अहं समीपे निवसन्तौ मम पितामहीपितामहौ द्रष्टुं गच्छामि। अहं नगरे निवसामि। तत्स्थानम् इतः सर्वथा भिन्नम् अस्ति!

**समीरः** - सत्यं वा? ग्रामः नगरात् कथं भिन्नमस्ति?

[redacted]

[redacted]

© NCERT not to be republished

**अनिता** - आम्, नगरम् अत्यन्तं व्यस्तं जनसम्मर्दयुक्तञ्चास्ति, यत्र सर्वत्र उन्नतानि भवनानि सन्ति। अत्र यादृशी निर्जनता अस्ति, तदपेक्षया नगरप्रदेशे कोलाहलम् अधिकमस्ति। अपि च नागरिकाः जनाः अधिकं स्वावलम्बिनः भवन्ति किन्तु प्रायः स्वप्रतिवेशिनः अपि न जानन्ति।

**समीरः** - अहो! अत्र सर्वे सर्वान् जानन्ति, परस्परं साहाय्यं कर्तुं च सदा तत्पराः सन्ति - वयं क्षेत्रेषु मिलित्वा कार्यं कुर्मः, मिलित्वा उत्सवान् आचरामः, सामूहिकरूपेण निर्णयान् अपि स्वीकुर्मः।



**अनिता** - अस्तु, नगरे अद्यापि किञ्चित्ककः समुदायबोधः अस्ति। कदाचित् प्रवलवर्षायाः कारणात् एकं गृहं द्वयोः मार्गयोः मध्ये परितं जातम्। तदा परितः सहस्रजनाः तत्र समागत्य शीघ्रमेव भग्नावशेषान् निष्कासयितुं साहाय्यं कुर्वन्ति, अन्तः कोऽपि बद्धः अस्ति, न वा इत्यपि पश्यन्ति।

**समीरः** - एतादृशेषु प्रकरणेषु स्थानीयसर्वकारः साहाय्यं न करोति वा ?

**अनिता** - आम्, करोति एव। वस्तुतः अस्माकं कृते स्थानीयनगरनिगमः , निर्वाचितप्रतिनिधयश्च सन्ति ये अस्माकं प्रतिनिधित्वं कुर्वन्ति, अस्माकं हिताय चिन्तयन्ति च।

**समीरः** – अस्तु सम्यक्। एषस्तु अस्माकं ग्रामपञ्चायतसदृशः एव। केवलं ततः बृहत्तरः अस्ति। अत्रापि सदस्याः निर्वाचिताः भवन्ति, परन्तु ते सर्वे परस्परं जानन्ति इति कारणात् बहु अधिकाः जनाः तत्र भागं ग्रहीतुं शक्नुवन्ति तथा ग्रामसम्बद्धानां सर्वविधसमस्यानां च विषये चर्चां कर्तुं शक्नुवन्ति। कदाचित्, बालकानां समस्याः अपि श्रूयन्ते।

**अनिता** - सत्यं वा? भवान् एतत् न कल्पयति?



© NCERT not to be republished

समीरः - सर्वथा न! एकस्मिन् दिने केचन बालकाः दृष्टवन्तः यत् विद्युत्तारः आपत्कररूपेण अधः लम्बते, भवनस्य छतम् प्रायः स्पृशति स्म। न केवलं वयं तत् निवेदितवन्तः, अपितु विद्युत्स्तम्भस्य इषत् स्थानान्तरणं करणीयम् इति अस्माकं ग्रामसभासदस्यानां मध्ये एकम् अवबोधयामः। तच्च कृतं वर्तते!

अनिता - बहु उत्तमम् ! अहं मन्ये यत् लोकतन्त्रे तथैव कार्यं करणीयम् । एषा प्रक्रिया नगरे किञ्चिद् जटिलं दृश्यते, परन्तु विचारः समानः एव - सर्वेषां मतं महत्त्वपूर्णमस्ति ।

समीरः - आम्, भवति तत् सत्यम् ! परन्तु क्षम्यताम्, इदानीं मया गन्तव्यम्। किञ्चित् क्रयणार्थं मातुः मम साहाय्यम् अपेक्षितम् अस्ति। नगरस्य विषये भवती एतावत् ज्ञापितवती इति तस्य कृते धन्यवादः।

अनिता - भवानपि धन्यवादार्हः यत् भवतः ग्रामस्य विषये एतावत् कथितम्! अहं अवश्यमेव परितः द्रष्टुं गच्छामि।

समीरः - अस्तु, कदाचित् पुनः साक्षात्कारः भविष्यति । पुनर्मिलामः !

## अग्रे गमनात् प्राक् ...

→ नागरिकक्षेत्रेषु विकेन्द्रीकृतप्रशासनं विभिन्नस्थानीयपौरसंस्थानां माध्यमेन कार्यं करोति, याः नागरिकजीवनसम्बद्धानि विविधानि कार्याणि निर्वहन्ति ।

→ ग्रामीणक्षेत्राणि इव स्थानीयपौरसंस्थासु अपि नागरिकाणां प्रतिनिधित्वं कुर्वन्तः सदस्याः निर्वाचिताः सन्ति ।

→ स्थानीयसंस्थाः स्वकार्यं कुशलतया कर्तुं समर्थाः भवेयुः इति तस्य कृते नागरिकानामपि कर्तव्यं भवति ।

## प्रश्नाः, क्रियाकलापाः परियोजनाश्च

१. विद्यालयं गच्छन्तः भवान्/भवती भवतः/भवत्याः मित्राणि च पश्यन्ति यत् जल-नलिका स्राविता अस्ति इति। स्रावस्य कारणात् जलस्य अपव्ययः भवति। एतादृशस्थितौ भवान्/भवती स्वमित्रैः सह किं करिष्यति?

२. समीपस्थायाः स्थानीय-पौर-संस्थायाः कमपि सदस्यं स्ववर्गे आमन्त्रयन्तु। तेषां भूमिकायाः उत्तरदायित्वस्य च विषये तैः सह चर्चां कुर्वन्तु। एकां प्रश्नावलीं निर्माय तान् प्रश्नानि पृच्छन्तु येन सभायाः प्रयोजनं सफलं भवति।


© NCERT not to be republished

३. स्वपरिवारस्य एवञ्च समीपस्थस्य प्रौढसदस्यैः सह चर्चां कुर्वन्तु, तथा स्थानीयात् पौरप्रशासनात् तेषाम् अपेक्षाणां एकां सूचीं कुर्वन्तु ।

४. एकस्य उत्तमस्य नागरिकप्रशासनस्य वैशिष्ट्यानि सूच्यां लिखन्तु।

५. ग्रामीणक्षेत्रेषु पञ्चायतराजव्यवस्थायाः स्थानीयस्य पौरप्रशासनस्य च मध्ये काः समानताः के भेदाश्च सन्ति?

# नूडल्स्

© NCERT
not to be republished



*'नूडल्स्' इति नोटस्, डूडल्स् इत्येतयोः द्वयोः शब्दयोः संक्षिप्तं रूपम्!